॥कात्यायनीतंत्रोक्तचंडीपूजनविधि॥पत्र२४॥

॥श्रीगणेशायनमः॥ ॥कात्यायनीतंत्रोक्तप्रयोगलिख्यते॥
ॐ॥अस्याशापोद्धारोत्कीलनेकात्यायनीतंत्रोक्तेत्रयोदशा
ध्यायंपठित्वाप्रथमंपठेत्॥ततोद्वादशद्वितीयोततएकादशतृ
तीयाविलिक्रमेणपठेत्॥ततोदशमचतुर्थोततोनवमपंचमोत
तोष्टमषष्ठोततःसप्तमंद्विरिति शापोद्धारःप्रथममध्यमचरित
पठित्वाततःप्रथमतृतीयेपठेत्॥इत्युत्कीलनं॥इतिकेरलाः॥
अथप्रसंगात्स्तोत्रपाठविधिः॥तत्रवाराहीतंत्रे॥आधारेस्थाप
यित्वातुपुस्तकंवाचयेत्ततः॥हस्तसंस्थापनाद्देवी भवेत्सर्वफलंप्र

१

तः॥ यावन्नपूर्यतेध्यायस्तावन्नविरमेत्पठेत्। यदि प्रमादादध्या
येविरामोनवनिःप्रिये॥ पुनरध्यायमारभ्यपठेत्सर्वमुक्तमुक्तः
अनुक्रमात्पठेद्देविशिरःकंपादिकंत्यजेत्॥ एवंपूर्वमुच्चार्य
स्तोत्रंवासंहितांपठेत्। अंतेचप्रणवंदद्यादित्यवाचादिपूरुषः॥
नमानसंपठेत्स्तोत्रंवाचिकंतुप्रशस्यते। यत्तुकीलकोशनैस्तु
प्यमानेस्मिन्स्तोत्रेसंपत्तिरुच्चकैरिति॥ तदुत्कच्चैःपाठनिषेधक
च। पुस्तकेवाचनंशास्त्रंसदस्त्रादधिकंयदि॥ ततोन्यूनस्यतुनवे
वाचनंपुस्तकंविना॥ ऋषिछंदोंगंविन्यस्यैपठेत्स्तोत्रंसमाहितः

स्तोत्रेनदृश्यतेयत्रप्रणवन्यासमाचरेत्। ऊर्द्धेनाचलचित्तेनपरि
तुर्व्यप्रयत्नतः॥ नस्वयंलिखितंस्तोत्रंनाब्राह्मणलिपिंपठेत्। नच
स्वयंकृतंस्तोत्रंतथान्येनचयत्कृतं॥ यतःकलौप्रशंसंनिरुक्तिनि
र्णिनंतुयत्। अर्गलंकीलकंचादौजपित्वाकवचंपठेत्॥ ऊपेस
प्तशतीपश्चात्क्रमएषशिवोदितः॥ इतिकेरलसंप्रदायः॥ अत्ररा
त्रिसूक्तदेवीसूक्तेवैदिकेइतिक्वचित्। रात्रिसूक्तंप्रथमाध्याय
स्थंविश्वेश्वरीसूक्तं। देवीसूक्तंनमोदेव्याइत्यादिपंचमाध्यायस्थ
मित्यपरे॥ अन्योपिप्रकारस्तंत्रोक्तः॥ कृष्णाष्टमीसमारभ्ययावत्क

२

ल्लचउदर्शी। वृध्यैकोत्तरयाज्ञाप्यं पूर्वसंपुटितं उयत्। एवं देवीम
यापोक्तः पुरश्चरणक्रमः॥ तदंते हवनं कुर्यात्प्रतिश्लोकेन पा
यसैः। प्रतिश्लोकेति कात्यायनीतंत्रोक्तमंत्रोपलक्षणं। रात्रिसू
क्तं त्रिनिरूचं तपादेव्याश्च सूक्तकं। षष्ठाष्टसंख्यं प्रत्यृचमुक्तमं
त्रोपलक्षणं। कृत्वा ते प्रजपेत्स्तोत्रमादौ हृज्जादिकं मुने। समुदाये
सूक्तव्यवहारस्य लक्ष्मीतंत्रे उक्तत्वात् तदवयश्लोका एवात्र रूचइ
ति बोध्यं प्रत्यृचमित्यत्रापुक्तः। शेषे बोध्यः प्रपरश्च। अथातः सं
प्रवक्ष्यामि नवरात्रिविधानकं। जपेदेकोत्तरां वृद्धिं दिनानि नव सं

ख्यया॥१॥ इत्थोक्तेनैव विधिना पूजां कृत्वा प्रयत्नतः। नवाक्ष
राविक्षनेन संपूज्याथ विचक्षणः॥२॥ सहस्रं प्रजपेन्मंत्रं प्रत्ये
कं च यथाविधि। मध्ये चैकोत्तरां वृद्धिं जपेद्देव्यास्त्वमं मनुं॥३॥ कृ
त्वा दशांशतो होमं तत्र सिद्धिं समाप्नुयात्। अपरं च॥ जपेद्दिवं
समाश्रित्य समासमेकं तु योनरः। कृत्वा बिल्वदलैर्मासं मधुरत्र
यं योगतः॥४॥ कृत्वा दशांशतो वापि कमलैः क्षीरसंयुतैः। धन
देन समा लक्ष्मीं प्राप्नुयादुत्तमां ध्रुवां॥५॥ हरगौरीतंत्रे॥ श्रीका
मः पुष्टिकामो वा पुष्टिमार्गक्रमेण तु। जपेच्छक्रादिमारभ्य सर्व

३

नदेत्यवधावधि। आदिमारभ्यप्रजपेत्सश्चाछिषंसमापयेत्।
शांत्यादिकामःसर्वत्रस्थितिमार्गक्रमेणतु॥७॥ब्राह्मणद्वाराक
रणेतुदक्षिणाविशेषउक्तस्तत्रैव॥पंचस्वर्णशतावृत्तेदशावृ
त्तेतुतत्त्रयं।पंचावृत्तिस्वर्णमेकंत्रिरावृत्तेतदर्द्धकं॥८॥एका
वृत्तेपादमेकंदद्याद्वाशक्तितोबुधः।इतिशतावृत्यादौकामना
नेदउक्तोवाराहीतंत्रे॥कृतेप्रदीपितेवक्तौतिव्धन्यादि
तंकुलान्।धर्मार्थकामसंवृद्धौमोक्षार्थंपायसंकुनेत्॥९॥मा
रणेमोहनेचैवतथोच्चाटनकर्मणि।कुर्यान्मासत्रिमध्वर्कमो

ऽनेमधुपायसं॥१०॥स्नंननेमाउलफलंवश्येउसितसर्षपान्।
धर्मार्थकाममोक्षार्थंपूर्वशिरानिमुखोऽुमेव॥११॥मोहनेमारणे
चैवऽुनेवैदक्षिणामुखः॥उच्चाटनेउत्तरास्यइत्यादनगवान्भ
वः॥१२॥क्रोडतंत्रे॥प्रत्येकावर्त्तनंदेविइयमेधेनसंमितं॥त्रिरा
वृत्यावन्नेलाभान्मंचावृत्यारिऽुंनपेत्॥१३॥इतिसर्वेष्टसिद्धि
॥कात्यायन्यैविद्महेकंन्यकुमारिधीमहि॥तन्नोऽुर्गाप्रचोद
यात्॥इत्येषागायत्रियजुर्वेदे॥अथप्रयोगांतरंकात्यायनी
तंत्रे॥ध्वहिषोडशंगुलमितंचउरंगुलोन्नतंस्थंडिलंकृत्वा

तत्र शुद्धगोघृतेनैकस्मिन्पात्रे रुद्रवर्त्तिकत्रयोदशदीपान्॥ प्र
ज्वाल्य दीपेषु प्रथमदीपे प्रथमाध्यायदेवतामावाह्यासनपाद्या
दिगंधदानांतां पूजां कृत्वा पुष्पसमर्पणे समये वक्ष्यमाणैर्न
वभिः प्रतिश्लोकं पुष्पाणि समर्पयेत्॥ ततः प्रथमाध्यायसमा
प्तौ वक्ष्यमाणनवभिः श्लोकैः प्रतिश्लोकं पुष्पाणि समर्प्य धूप
दीपौ दत्वा पायसं नैवेद्यं दत्वा तांबूलं दक्षिणां च दत्वा नीराज्ये
कं ब्राह्मणं सुवासिनीं कुमारीं च भोजयेत्। संकल्पयेद्वा॥१॥
एवं तन्नदध्यायदेवतामावाहनादिब्राह्मणभोजनांतं प्रत्यध्या

यं कुर्यात्॥ अनेन घृतनैवेद्यादिनिर्मल्यपूजा। अनुग्रहेष्टवा
क्तिसमाप्तिः॥ नित्यहोमपाराक्रो। श्लोकास्तु॥ विश्वेश्वरीं जगद्धात्रीं १
स्तुत्वा सुरैः सर्वमनीष्टसंश्रयात् करोतु सानः शुभहेतुः २ यासां
व्रतं चोद्धतदैत्यतापितैः करोतु सानः ३॥ याच स्मृता तत्क्षणमेव हंति
नः करोतु सानः ४॥ सर्वाबाधाप्रशमनं ५॥ अत्र वैरिनाशनमित्यत्र
रोगनाशनमित्याद्यूहः॥ एवं दैत्यतापितैरित्यत्रापि ५ सर्वमंगल्ये ६ सृष्टिस्थितिविनाशानां ७ शरणागतदीनार्त्तपरित्राणे ८ सर्वस्वरूपे सर्वेशे ९ एतेनुयहेनवश्लोकाः वश्येतु विशेषः ईक्षीरक

५

चामुंडे कुरु कुरु अमुकं मे वशमानय स्वाहा॥ अनेन प्रत्याध्या
यमाद्यंतयोः पूजा सर्वत्र अयुतमंत्रजपः अयुतहोमश्च॥ हो
मयेत्कटुतैलेन रक्तचंदनराजिकाः॥ सहस्राहुतिमात्रेण रा
जानं वशमानयेत्। मधुनाशोकपुष्पं चरात्रौ कृत्वा उपूर्ववत्
चक्रवर्त्तिनं वेद्यस्य चंडीमंत्रप्रभावतः। अंतेशतं ब्राह्मणाश्च
कुमार्यश्च भोजनीयाः। धनार्थे बिल्वपत्रैः पूजा वश्यार्थं करवीर
पुष्पैः उपास्तु केमेर्वा पुत्रार्थं तुलसीदलैः पुष्ट्यर्थं पंकजैः॥ महा
कार्यार्थप्रयोगे तु षोडशमाषैः स्वर्णमूर्त्तिं सत्वाकलशस्थापन

कृत्वातदग्रेघंटार्गलयंत्रेषंट्कोणयंत्रेवादीपंसंस्थापयेत्।यंत्र
मंत्रसर्वसाधारणं।महतिकार्येऊनपंचाशद्दिनानिमध्येचतुर्वि
शतिः।तदर्द्धमध्ये।एवमेवस्वेर्णमूर्त्तिप्रमाणमपिबोध्यंब्राह्मणा
स्त्रयोमहत्कार्येप्रयोगकर्त्तारः।अन्येत्वेकः।।नियदेतु।।सर्वाबाधा
प्रशमनमित्यस्यायेएवमुत्कासमुत्सयेतिपठेत्।।अत्रप्रयोगेक
चित्तर्प्पणमप्युक्तं।त्रयोदशपात्रांदुग्धेनापूर्यांघ्रितयोःपुष्पांजलिं
दत्वाप्रतिश्लोकंप्रथमाध्यायदेवतांतर्पयामीतिमहाप्रयोगेतर्प्पये
त्।।तथात्रयोदशस्तुअग्निषुक्रमात्तदध्यायदेवताआवाह्यसंपू

ज्यप्रतिश्लोकमोंप्रथमाध्यायदेवतायैनमःस्वाहेतिमंत्रेणपाय
सेनजुहुयाद्। प्रत्यहंयावत्प्रयोगसमाप्तिंत्रयोदशब्राह्मणसु
वासिनीकुमार्यएकोऽनुपनीतोऽष्टवर्षएकउपनीतश्चभोज्ज
नीयःपरार्थेप्रयोगेतुसत्याःसंतुयुज्जमानस्यकामाइतिप्रति
श्लोकंप्रत्यध्यायंवापठेत्॥इदंसर्वंपरार्थेप्रयोगेबोध्यं॥अत्र
त्रयोदशपात्रेषुत्रयोदशदीपाइत्यत्रमःपक्षःएकपात्रेत्रयो
दशदीपाइतिमध्यमःपक्षःएकस्मिन्नेवदीपेत्रयोदशदीपाइ
त्यधमःपक्षःविधिदीपेष्वक्षतपुंजेषुजलपात्रेषुअग्निषुकु

मारीषुवाकार्यइत्युपदेशः। अथप्रयोगांतराणिकात्यायनीतंत्रो
क्तानि। प्रतिश्लोकमाद्यंतयोः सप्रणवंजपेसिद्धिः॥१॥ सप्रणवम
नुलोमव्याहृतित्रयमादौअंतेविलोमंतदिसेवंप्रतिश्लोकंसह्वा
शतावृत्यापागेनिशीद्रंसिद्धिः२ प्रतिश्लोकमादौजातवेदसेइत्यु
चंपठेसर्वकामसिद्धिः॥३॥ अपमृत्युवारणायादावंतेचशतंत्र्य
बकमंत्रंजपेत्॥४॥ प्रतिश्लोकंतन्मंत्रंजपइत्यन्यत्र५प्रतिश्लोकंश
रणागतदीनार्तश्लोकंपठेसर्वकार्यसिद्धिः॥६॥ प्रतिश्लोकंकरोउ
सानःशुन्नइत्युरित्यर्द्धंपठेसर्वकामावाप्तिः॥७॥ स्वानीष्टवरप्रा

तोएवंदेव्यावरंलब्धेतिप्रतिश्लोकंपठेत्॥८॥सर्वापन्निवारणार्थं
प्रतिश्लोकंदुर्गेस्मृतेतिपठेत्॥९॥अस्यकेवलस्यापिश्लोकस्यका
र्यानुसारेणलक्षमयुतंसहस्रंशतंवाजपः॥१०॥सर्वबाधेत्यस्य
लक्षजपेश्लोकोक्तंफलं॥११॥इच्छंयदायदाबाधेतिश्लोकस्यलक्ष
जपेमहामारीशांतिः॥१२॥ततोवव्रेनृपोराज्यमितिमंत्रस्यलक्ष
जपेपुनःस्वराज्यलाभः॥१३॥दिनास्निदेत्यनेजांसिइत्यनेनसदी
पबलिदानेघंटावादनेचबालग्रहशांतिः॥१४॥आद्यावृत्तिमनुलो
मेनत्रयोदशाध्यायान्पठित्वाततोविपरीतक्रमेणद्वितीयांकृत्वापु

नरनुलोमेनेत्येवमावृत्तित्रयेऽक्तेषुप्रकारेषुशीघ्रंकार्यसिद्धिः॥
१५॥सर्वापन्निवारणायदुर्गेस्मृतेत्यर्द्धतनोयदंतियच्चदूरकेइत्यु
र्चतदंतेदारिद्र्यदुःखेत्यर्द्धेएवंकार्यानुसारेणलक्षमयुतंसहस्रंश
तंवाजपः॥१६॥कांसोस्मीत्यृचंप्रतिश्लोकंपाठेलक्ष्मीप्राप्तिः॥१७॥मा
रणार्थमेवमुत्कासमुत्पत्येतिप्रतिश्लोकंपठित्वामारणोक्तावृत्तिभिः
फलसिद्धिः॥१८॥ज्ञानिनामपिचेतांसीतिश्लोकजपमात्रेणसद्योमो
हनमित्यनुभवसिद्धं॥प्रतिश्लोकंतत्श्लोकपाठेवश्यं॥१९॥रोगाना
शेषानितिश्लोकस्यप्रतिश्लोकपाठेसकलरोगनाशः॥२०॥तन्मा

त्रजपेपिसः इत्यक्त्वासानगवती॥ गंभीरेतिश्लोकस्यप्रतिश्लोकंपा
ठेपृथक्जपेवाविद्याप्राप्तिः॥२१॥ नगवत्याहर्तसर्वइत्यादिद्वाद
शोत्तरशताक्षरमंत्रः सर्वकामदः सर्वपीडानिवारणश्च॥२२॥ दिविप्र
पन्नार्त्तिहरेप्रसीदइतिश्लोकस्ययथाकार्यंलक्षायुतसहस्रशतान्य
तमेप्रतिश्लोकपाठेसर्वपीडानिवृत्तिः सर्वकामावाप्तिश्च॥२३॥ एषुप्र
योगेषुप्रतिश्लोकंदीपायेकेवलमेववानमस्कारकरणेतिशीघ्रसि
द्धिः॥२४॥ प्रतिश्लोककामबीजसंपुटीतस्यैकचत्वारिंशद्दिनंत्रि
सप्तवारौसर्वकामसिद्धिः॥२५॥ एकविंशतिदिनपर्यंतंजक्तरीत्यादश

वृत्तौवशीकरणं॥२६॥मायाबीजसंपुटितस्यफट्पल्लवसहितस्य
सप्तदिनपर्यंतंत्रयोदशावृत्तौउच्चाटनसिद्धिः॥२७॥तादृशस्यैवदि
नचतुष्टयमेकादशवृत्तौसर्वोपद्रवनाशनः॥२८॥एकोनपंचाशद्दि
नपर्यंतंप्रतिश्लोकंत्रिबीजसंपुटितस्यपंचदशावृत्तौलक्ष्मीप्राप्तिः॥२
९॥प्रतिश्लोकमैंबीजसंपुटितस्यशतावृत्त्याविद्याप्राप्तिः॥३०॥अथै
तत्स्तोत्रपाठेडामरकल्पोक्तोनवार्णसंपुटीकरणप्रयोगः॥तत्रादौत
दुद्धारः॥ऐंबीजमादौदुसमानदीप्तिंकौसूर्यतेजोद्युतिमद्वितीयंक्रौ
मूर्त्तिविश्वानरतुल्यरूपंतृतीयमानंदसुखायचिंत्यं॥चाक्रुद्धजांबू

नरकांतिहूर्यंनृपंचमंरक्ततरंप्रकल्प्यं।डाषष्ठमुग्रार्त्तिहरंसुशीलं
येसप्तमंरक्तरतंरिपुघ्नं॥१॥विपांडुरंत्वष्टममादिसिद्धंचेष्टमुवर्णन ४
वमंविशाखं॥ऐंह्रींक्लींचामुंडायैविच्चे॥इतिनवाक्षरीमंत्रः नाभिमा
त्रजलेसदस्त्रजपात्कवितासिद्धिः।अयुतजपेराजबंधनसंकटा
दिभ्योमोक्षः।अस्मिन्नवाक्षरेमंत्रेमहालक्ष्मीर्व्यवस्थिता।तस्मा
त्सुसिद्धःसर्वेषांसर्वदिक्षुप्रदीपकः॥अनेनात्रसिद्धादिविचारो
नास्तीतिज्ञापितं॥नवाक्षरस्यऋषयोब्रह्मविष्णुमहेश्वराः छंदां
स्युक्तानिमुनिभिर्गायत्र्युष्णिगनुष्टुभः देवताःप्रोक्तामहाकालीपूर्वका

लक्ष्मीः सरस्वती। नंदाशाकंभरी भीमाः शक्तयोस्यमनोः स्मृताः।
स्याद्भक्तर्दतिकादुर्गा भ्रामर्यो बीजसंचयः। अग्निर्वायुर्नगास्तत्वं फलं
वेदत्रयोद्भवा नगः सूर्यः सर्वाभीष्टप्रसिध्यर्थे विनियोग उदाहृतः।
ऋषिछंदोदेवतानि शिरोमुखहृदि न्यसेत्॥ शक्तिबीजानि स्तनयो
स्तत्वानि हृदये पुनः मंत्राणां पल्लवो वासो मंत्राणां प्रणवः शिरः शि
रः पल्लवसंयुक्तो मंत्रः कामदुघो भवेत्॥ पल्लवाश्च॥ नमोंतः शांतिके
पुष्टौ प्राणिपाते च कीर्त्तिताः॥ वश्याकर्षणयोः शेषे मेषु स्वाहांतः सिद्धि
दायकः वौषट् पल्लवसंयुक्तो मंत्रः पुष्ट्यादिसाधकः हुंकारपल्लवो पे

तोमारणेब्रास्मर्णविनायंत्रनंऊनकार्येषुसुघोरभयनाशनोव
र्ड्तःप्रकल्पस्तुग्रहाबाधाविनाशकः॥उच्चाटनेउसंप्रोक्तोमंत्रः
कूटपध्रवान्वितः॥एतेपध्रवास्तुतत्कर्मणिचंडीपाठेपिश्लोकांत
रोयोज्याः॥न्यासहीनोनवेन्मूकोमृतःस्याछिरसोविना।अप
ध्रवस्तुनग्नःस्यात्सुप्तःस्यादासनंविना।गुरुंविनातृथामंत्रःस्व
ल्पजापस्तुशून्यकः।निर्वीर्योदुष्टदत्तःस्यान्नान्यबीजस्तुकीलि
तःदुष्टदत्तःदुष्टायदत्तइत्यर्थः।देवछंदर्षिहीनोयःसउप्रोक्तोभु
जंगमः।मूकादयोमंत्रविज्याः।वैदिकेमंत्रेत्रपध्रवादिविचारः।स्त्री

चंडिकायेइत्यनेनास्यमंत्रस्यस्तोत्रस्यचषडंगकरन्यासो।नवबीज
मकसमस्तमंत्रेणचषडंगः अस्त्रंसर्वदिक्षुबोध्यं।नवबीजमंत्रांतेघं
टिकातृप्यतामितिमंत्रेणतर्पणं।एवंहोमादिष्वपिऊह्यं।लिखेदष्टद
लंपद्मंकुंकुमागरुचंदनैः।पद्ममध्येलिखेच्चक्रंषट्कोणंचंडिकाम
यं।षट्कोणचक्रमध्यस्थमाद्यंबीजत्रयंन्यसेत्।तत्रमध्यबीजेम
हालक्ष्मीवामेमहासरस्वती।दक्षेमहाकाली पूर्वादिषट्सुकोणे
षुबीजान्यन्यानिविन्यसेत्॥इदंपूजायंत्रं॥पद्मासनाद्यन्यतममा
सनंतथासप्तशतीश्लोकैर्न्यासैःखड्गिनीशूलिनीत्यादिपठित्वाश्लो

कपंचकं। आद्यं कल्पतरं बीजं। ध्यात्वा सर्वांगिके न्यसेत्। आद्यमै
मिति॥ हृल्लेनपाहिनोदेवीत्यादिश्लोकचतुष्टयं पठित्वा सूर्यसदृशं
द्वितीयं सर्वतो न्यसेत्॥ द्वितीयं ह्रीं इति॥ सर्वस्वरूपे इत्यादिश्लोका
नां पंचकं पुनः॥ पठित्वा स्फटिकाभासं॥ तृतीयं बीजं खतनो न्यसेत्
॥ तृतीयं क्रीं इति॥ १॥ उक्तैरेव श्लोकैस्त्रिद्वयेन षडंगन्यासोपि क
चिदुक्तः॥ ततः षडंगं कुर्वीत विनक्तैर्मूलवर्णकैः॥ एकेनैकेन चैके
न चतुर्भिर्युगलेन च॥ समस्तेन च मंत्रेण कुर्याद्दिगानि षट्सुधीः
॥ ततः कचित्॥ एवं न्यासविधिं कृत्वा सृष्टिमुद्रां विलोकयेत्॥ ततः

परिषिंचेदिति पूजार्थं द्रव्याणि नववीजतः॥ तत्पृष्ठोद्भवांमुद्रां
दत्वास्त्रेणावगुंठयेत्। अर्घ्यपात्रं प्रतिष्ठाप्य पूरयेच्छुभचारिणा॥
गंधपुष्पाक्षतांस्तत्र विन्यसेन्नृपनंदन। ध्यात्वा सर्वाणि तीर्थानि
हस्तौ दत्वा निमंत्रयेत्॥ रक्षार्थं तस्य कर्तव्या चक्रमुद्रास्त्रसंयुता।
अर्घ्योदकेन संस्कारं पूजाद्रव्यस्य पूर्ववत्। ततः उक्तयंत्रे पंचोपचा
रैः पूजा महाकाल्यादित्रिशक्तिध्यानं विधाय॥ एवं कृत्वा जपेच्चक्र
चतुर्थं तद्दशांशतः। पायसान्नेन जुहुयात् पूजितेद्धे मरेतसि॥ एतद्दे
वास्य पुरश्चरणं। मार्कंडेयपुराणोक्तं नित्यं चंडीस्तवं पठेत्। पाठितं

मूलमंत्रस्यजपेनाप्नोतिवांछितं। शतमाद्यौशतंचांतेजपेन्मंत्रंनवार्ण
वं। चंडीसप्तशतीमध्येसंपुटोयमुदाहृतः॥ सकामःसंपुटोजाप्यो
निष्कामःसंपुटंविनेतिक्वचित्॥ उसप्तशत्याश्चरित्रेप्रथमेपद्मचतु
र्मुनिः। छंदोगायत्रमुदितंमहाकाल्युदेवता। वाग्बीजं। पावकस्तत्त्वं।
धर्मार्थविनियोजनं। मध्यमेउचरित्रेउमुनिर्विष्णुरुदाहृतः। उ
ष्णिक्छंदोमहालक्ष्मीर्देवताबीजमुद्रिता। वायुस्तत्त्वंधनप्राप्तौ
विनियोगउदाहृतः। उत्तरस्यचरित्रस्यऋषिःशंकरईरितः। त्रि
ष्टुप्छंदोदेवतास्यमहाकालीसरस्वती। कामोबीजरविस्तत्त्वंकामा

ध्यैविनियोजनं। क्वचित्संपूर्णस्तोत्रस्य मार्कंडेयऋषिः। ब्रह्मविष्णु
महेश्वरा ऋषयः॥ महाकाली महालक्ष्मी महासरस्वत्यो देवताः। गा
यत्र्युष्णिग्वगनुष्टुप्छंदांसि। ऐं ह्रीं क्लीं बीजानि। चामुंडा शक्तिः। अग्नि
वायुसूर्यस्तत्वानि। सर्वानिष्टसिध्यर्थे जपे विनियोगः॥ एवं संस्मृत्य क
व्यादीन्ध्यात्वा पूर्वोक्तमर्गलः। सार्धसप्तशतीं पठेच्चंडीस्तवं स्पष्टपदाक्षरं।
समाप्तौ उमहालक्ष्मीध्यात्वा षडंगकं कृत्वा जपेदष्टशतं मूलं देवता
ये निवेदयेत्॥ आदावष्टम्येशतं जपः॥ आश्विनस्य सितेपक्षे आरभ्या
श्विनतिथिं सुधीः। अष्टम्यंतं जपेच्छ्रद्धं दशांशं होममाचरेत्॥ अंध

कश्चमहादैत्योऽग्रहिमपरायणः। कवचाकृतिमात्रेण महेशेननि
पातितः॥ ॥इतिकात्यायनीतंत्रोक्तचंडीपूजाविधिः समाप्तः॥श्री
शकेसप्तदशशतैकत्रिंशप्रवर्त्तमानेविभवनाम्निसंवत्सरेउदगय
नेग्रीष्मर्तौज्येष्ठेमासिसितेपक्षेचतुर्थ्यांगुरुवारेएलिखितंवि
वेकपनामकछक्ष्मदेवात्मजशिवदेवेनशुभं। ॥श्रीरस्तु।
व्यावहारिकसंवत्१९५५वर्षेज्येष्ठशुक्लचतुर्थ्यांगुरुवारेण।
शुभमस्तुसर्वजगतः। ॥श्रीमंगलमस्तु। ॥श्री॥ ॥ १४